वसुन्धराप्रकृतिर्यथा,—
"प्रधानांशस्वरूपा च प्रकृतेश्च वसुन्धरा।
आधाररूपा सर्व्वेषां सर्व्वशस्यप्रसूतिका॥
रत्नाकरा रत्नगर्भा सर्व्वरत्नाकरालया।
प्रजाभिश्च प्रजेशैश्च पूजिता वन्दिता सदा॥
सर्व्वोपजीव्यरूपा च सर्व्वसम्पद्विधायिनी।
यया विना जगत् सर्व्वं निराधारं चराचरम्॥१॥
प्रकृतेश्च कला या यास्ता निबोध मुनीश्वर!।
यस्य यस्य च याः पत्न्यस्ताः सर्व्वा वर्णयामि ते॥
स्वाहा देवी वह्निपत्नी त्रिषु लोकेषु पूजिता।
यया विना हविर्दानं न ग्रहीतुं सुराः क्षमाः॥१
दक्षिणा यज्ञपत्नी च दीक्षा सर्व्वत्र पूजिता।
यया विना च विश्वेषु सर्व्वं कर्म्म च निष्फलम्॥२॥
स्वधा पितॄणां पत्नी च मुनिभिर्मनुभिर्नरैः।
पूजिता पितृदानञ्च निष्फलञ्च यया विना॥३॥
स्वस्तिदेवी वायुपत्नी प्रतिविश्वेषु पूजिता।
आदानञ्च प्रदानञ्च निष्फलञ्च यया विना॥४॥
पुष्टिर्गणपतेः पत्नी प्रतिविश्वेषु पूजिता।
यया विना परिक्षीणाः पुमांसो योषितो भवेत्॥५॥
अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता भवे।
यया विना न सन्तुष्टाः सर्व्वे लोकाश्च सन्ततम्॥६
ईशानपत्नी सम्पत्तिः पूजिता च सुरैर्नरैः।
सर्व्वलोका दरिद्राश्च विश्वेषु च यया विना॥७॥
धृतिः कपिलपत्नी च सर्व्वैः सर्व्वत्र पूजिता।
सर्व्वलोका अधैर्य्याः स्युर्ज्जगत्सु च यया विना॥८
यमपत्नी क्षमा साध्वी सुशीला सर्व्वपूजिता।
समुन्मत्ताश्च रुष्टाश्च सर्व्वलोका यया विना॥९॥
क्रीडाधिष्ठातृदेवी च कामपत्नी रतिः सती।
केलिकौतुकहीनाश्च सर्व्वलोका यया विना॥१०
सत्यपत्नी सती मुक्तिः पूजिता जगतां प्रिया।
यया विना भवे लोका बन्धुतारहिताः सदा॥११
मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया।
सर्व्वे लोकाश्च सर्व्वत्र निष्फलाश्च यया विना॥१२
पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपातिपूजिता।
यया विना जगत् सर्व्वं जीवन्मृतपरं मुने!॥१३
सुकर्म्मपत्नी कीर्त्तिश्च धन्या मान्या च पूजिता।
यया विना जगत् सर्व्वं यशोहीनं मृतं यथा॥१४
क्रिया उद्योगपत्नी च पूजिता सर्व्वसम्मता।
यया विना जगत् सर्व्वमुच्छिन्नमिव नारद!॥१५॥
अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगत्सुच्छन्नं विधिनिर्म्मितम्॥
सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी।
अर्द्धावयवरूपा च द्वापरे संवृता भिया॥
कलौ महाप्रगल्भा च सर्व्वत्र व्यापिका बलात्।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे॥१६॥
शान्ति-१७ र्लज्जा १८ च भार्य्ये द्वे सुशीलस्य च पूजिता।
याभ्यां विना जगत् सर्व्वमुन्मत्तमिव नारद!॥
ज्ञानस्य भार्य्यास्तिस्रश्च बुद्धि-१९ र्मेधा २० स्मृति-२१ स्तथा।
याभिर्व्विना जगत् सर्व्वं मूढं मृतसमं सदा॥
मूर्त्तिश्च धर्म्मपत्नी सा कान्तिरूपा मनोहरा।
परमा सा च विश्वौघा निराधारा यया विना॥
सर्व्वत्र शोभारूपा सा लक्ष्मीर्मूर्त्तिमती सती।
श्रीरूपा मूर्त्तिरूपा च मान्या धन्या च पूजिता॥२२॥
कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी।
सर्व्वलोकाः समाच्छन्ना मायायोगेन रात्रिषु॥२३॥
कालस्य तिस्रो भार्य्याश्च सन्ध्या-२४ रात्रि-२५ दिनानि च २६।
याभिर्व्विना विधात्रा च संख्यां कर्त्तुं न शक्यते॥
क्षुत्-२७ पिपासे २८ मनोभार्य्ये धन्ये मान्ये सुपूजिते।
याभ्यां व्याप्तं जगत् सर्व्वं युक्तचिन्तितमेव च॥
प्रभा च २९ दाहिका ३० चैव द्वे भार्य्ये तेजसस्तथा।
याभ्यां विना जगत् स्रष्टुं विधातापि नहीश्वरः॥
कालकन्ये मृत्यु-३१ जरे ३२ प्रज्वरस्य प्रिये प्रिये।
याभ्यां जगत् समुच्छन्नं विधात्रा निर्म्मितं विधौ॥
निद्राकन्या च तन्द्रा ३३ सा प्रीति-३४ रन्या सुखप्रिये।
याभ्यां व्याप्तं जगत् सर्व्वं विधिपुत्त्रविधेर्विधौ॥
वैराग्यस्य च द्वे जाये च श्रद्धा-३५ भक्ती ३६ च पूजिते।
याभ्यां शश्वज्जगत् सर्व्वं जीवन्मुक्तमिदं मुने!॥
अदिति-३७र्द्देवमाता च सुरभी ३८ च गवां प्रसूः।
दितिश्च ३९ दैत्यजननी कद्रुश्च ४० विनता ४१ दनुः ४२॥
उपयुक्ताः सृष्टिविधौ एताश्च प्रकृतेः कलाः॥*
कलाश्चान्याः सन्ति बह्व्यस्तासु काश्चिन्निबोध मे॥
रोहिणी ४३ चन्द्रपत्नी च संज्ञा ४४ सूर्य्यस्य कामिनी।
शतरूपा४५ मनोर्भार्य्या शचीन्द्रस्य च गेहिनी ४६॥
तारा४७ बृहस्पतेर्भार्य्या वशिष्ठस्य त्वरुन्धती ४८।
अहल्या ४९ गौतमस्त्री तु सानसूया ५० त्रिकामिनी॥
पितॄणां मानसी कन्या मेनका ५१ साम्बिकाप्रसूः।
लोपामुद्रा ५२ तथा भूती ५३ कुवेरकामिनी तथा॥
वरुणानी ५४ यमस्त्री च बलेर्व्विन्ध्यावली ५५ तथा।
कुन्ती च ५६ दयमन्ती च ५७ यशोदा ५८ देवकी ५९ सती॥
गान्धारी ६० द्रौपदी ६१ सव्या ६२ साविची६३ सत्यवत्प्रिया।
वृषभानुप्रिया साध्वी राधामाता कलावती६४॥
मन्दोदरी ६५ च कौशल्या ६६ सुभद्रा ६७ कैटभी ६८ तथा।
रेवती ६९ सत्यभामा ७० च कालिन्दी ७१ लक्ष्मणा ७२ तथा॥
जाम्बवती ७३ नाग्नजिती ७४ मित्रविन्दा ७५ तथापरा।
लक्ष्मणा ७६ रुक्मिणी ७७ सीता ७८ स्वयं-लक्ष्मीः प्रकीर्त्तिता॥
कला योजनगन्धा च७९ व्यासमाता महासती।
वाणपुत्त्री तथोषा ८० च चित्रलेखा च ८१ तत्सखी॥
प्रभावती८२ भानुमती८३ तथा मायावती८४ सती।
रेणुका ८५ च भृगोर्माता हलिमाता च रोहिणी ८६॥
एकानंशा ८७ च दुर्गांशा श्रीकृष्णभगिनी सती।
बह्व्यः सन्ति कलाश्चैव प्रकृतेरेव भारते॥
या याश्च ग्रामदेव्यस्ताः सर्व्वाश्च प्रकृतेः कलाः।
कलांशांशसमुद्भूताः प्रतिविश्वेषु योषितः॥*॥
योषितामपमानेन प्रकृतेश्च पराभवः।
ब्राह्मणी पूजिता येन पतिपुत्त्रवती सती॥
प्रकृतिः पूजिता तेन वस्त्रालङ्कारचन्दनैः।
कुमारी चाष्टवर्षीया वस्त्रालङ्कारचन्दनैः।
पूजिता येन विप्रस्य प्रकृतिस्तेन पूजिता॥*॥
सर्व्वाः प्रकृतिसम्भूता उत्तमाधममध्यमाः।
सत्वांशाश्चोत्तमा ज्ञेयाः सुशीलाश्च पतिव्रताः॥
मध्यमा राजसाश्चांशास्ताश्च भोग्याः प्रकीर्त्तिताः।
सुखसम्भोगवश्याश्च स्वकार्य्ये तत्पराः सदा।
अधमास्तामसाश्चांशा अज्ञातकुलसम्भवाः॥
दुर्मुखाः कुलटा धूर्त्ताः स्वतन्त्राः कलहप्रियाः।
पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणाः॥
प्रकृतेस्तामसांशांशाः पुंश्चल्यः परिकीर्त्तिताः।
एवं निगदितं सर्व्वं प्रकृतेः परिकीर्त्तनम्॥*॥
ताश्च सर्व्वाः पूजिताश्च पुण्यक्षेत्रे च भारते।
पूजिता सुरथेनादौ दुर्गा दुर्गतिनाशिनी॥
द्वितीये रामचन्द्रेण रावणस्य वधार्थिना॥
तत्पश्चाज्जगतां माता त्रिषु लोकेषु पूजिता।
जातादौ दक्षपत्न्यां च निहत्य दैत्यदानवान्॥
ततो देहं परित्यज्य यज्ञे भर्त्तुश्च निन्दया।
जज्ञे हिमवतः पत्न्यां लेभे पशुपतिं पतिम्॥
गणेशश्च स्वयं कृष्णः स्कन्दो विष्णुकलोद्भवः।
बभूवतुस्तौ तनयौ पश्चात्तस्याश्च शौनक!॥
लक्ष्मीर्म्मङ्गलभूपेन प्रथमे परिपूजिता।
त्रिषु लोकेषु तत्पश्चाद्देवतामुनिमानवैः॥
सावित्री चाश्वपतिना प्रथमे परिपूजिता।
तत्पश्चात्त्रिषु लोकेषु देवतामुनिमानवैः॥
आदौ सरस्वती देवी ब्रह्मणा परिपूजिता।
तत्पश्चात्त्रिषु लोकेषु देवतामुनिमानवैः॥
प्रथमे पूजिता राधा गोलोके रासमण्डले।
पौर्णमास्यां कार्त्तिकस्य कृष्णेन परमात्मना॥
गोपिकाभिश्च गोपैश्च बालिकाभिश्च बालकैः।
गवां गणैः सुरभ्या च तत्पश्चान्मायया हरेः॥
तदा ब्रह्मादिभिर्द्देवैर्म्मुनिभिर्मनुभिस्तथा।
पुष्पधूपादिभिर्भक्त्या पूजिता वन्दिता सदा॥